This question paper contains 8+4 printed pages]

*Your Roll No.* ..................................

6388

**B.A. (Hons.)/III** **E**

SANSKRIT—Paper IX (*ii*)

(Adhunika Sanskrit Sahitya)

(Admission of 2006 and onwards)

*Time : 3 Hours* *Maximum Marks* : 75

*(Write your Roll No. on the top immediately on receipt of this question paper.)*

*Note* :— Unless otherwise required in a question, answers should be written in Sanskrit *or* in Hindi *or* in English; but the same medium should be used throughout the paper.

**टिप्पणी** :— अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत या हिन्दी या अंग्रेज़ी किसी एक भाषा में दीजिए; परन्तु सभी उत्तरों का माध्यम एक ही होना चाहिए ।

Answer *all* questions.

सभी प्रश्नों के उत्तर दीजिये ।

1. निम्नलिखित का अनुवाद कीजिए : 4×2=8

Translate the following :

(क) शास्त्रगता परिभाषाऽधीता

गीतामृतकणिकापि निपीता ।

को जानीते तथापि भीता

केन हेतुना विलपति सीता ।

सुतरां शिथिला

सहते मिथिला

परिकम्पितान्तरा ॥ तदेव गगनं सैव धरा ॥

अथवा

(*Or*)

चिरबुभुक्षितैर्वृकैरकस्मात्

स्वर्णमयी रोटिकाऽसादिता ।

ये विविधासित-कर्म-विलग्नाः

तदङ्केषु लक्ष्मीर्विराजिता ॥

धिक् कष्टं वैषम्यम् ।

लोका अवलोकयत ॥

प्रतिशाखं संस्थिता उलूकाः

लोका अवलोकयत ।

(ख) दिशां वासो धत्ते न तु जिनमुनिर्नापि च शिवः

समस्तार्थैः शून्यस्तदपि न स त्यागीति कथितः ।

व्रतैः क्षीणं देहं कलयति तथाऽप्येष न यतिः

अयं भिक्षुर्याच्ञां प्रकुरुत इतो वामन इव ॥

**अथवा**

(*Or*)

यस्या वचांसि मधुराणि परं सुधायाः

यस्या दृशश्च मनसो हि रसायनानि ।

या चैव दैवमिह पूज्यतमं तयाऽद्य

मात्रा तु जीवितगती रहिता वृथैव ॥

2. निम्नलिखित की सप्रसंग व्याख्या कीजिए : 5

Explain the following with reference to the context :

क्षीणदुग्धा विवत्सा बुभुक्षाकुला:

साश्रुनेत्रा गवाशैर्विकृष्टा मुहुः ।

गा नदन्तीः समुत्प्रेक्ष्य शृङ्गाटके

बन्धनच्छेदनैः को नु गोपायते ॥

**अथवा**

*(Or)*

क्वचिद् भाषाभेदः क्वचिदथ तु देशीयविभिदा

क्वचिज्जातौ भेदः क्वचिदपि मते भेदधिषणा ।

क्वचित्सीमाभेदः क्वचिदपि जलीया च विमति-

र्न किञ्चिद्भो मातर्विगुणरहितं चात्र जगति ॥

3. संस्कृत में व्याख्या कीजिए : 5

Explain in Sanskrit :

भवेद् राष्ट्रस्य भाषा संस्कृतं वेद: सदाचार: ।

अखण्डं भारतं भूयादिति ध्यातुं यतन्ते के ॥

**अथवा**

(*Or*)

हृदये भवेन्न भीति:

पणके न चातिप्रीति:

उदरस्य पूरणार्थं मानं न च त्यजेयम् ।

इच्छामि जीवनं तत् यस्मिन् सुखं वसेयम् ॥

4. 'तदेव गगनं सैव धरा' कविता द्वारा प्राप्त होने वाले सामाजिक सन्देश का अपने शब्दों में वर्णन कीजिए । 6

Describe in your own words the social message conveyed through the poem 'तदेव गगनं सैव धरा'.

5. डॉ. पुष्पा दीक्षित **अथवा** प्रो. हरिदत्त शर्मा के जीवन एवं उनकी रचनाओं पर विस्तार से टिप्पणी लिखिए । 6

Write a detailed note on the life and works of Dr. Pushpa Dikshit *or* Prof. Haridutt Sharma.

6. निम्नलिखित का अनुवाद कीजिए : 5

Translate the following :

तस्य रूपं शीलं वृत्तिं च निरीक्ष्य 'स्ववर्गीयोऽयम्' इति ते विभावयन्ति स्म । ते झटिति एव तस्य कमण्डलुपेटिकादिकं गृहीत्वा तं मुक्तभारं कृत्वा मार्गश्रमं विनोदयितुं द्वारस्थपर्णशालां नीतवन्तः । स्नानाचमनयोरनन्तरं सोऽभ्यागताचारानुरूपं मुनिभोजनं फलमूलादिकं गृहीतवान् ।

सायंकाले सब्रह्मचारिभिः सुदामा महर्षेः सान्दीपनेः सार्वजनिक-प्रवचनकक्षायां यथाविधानं प्रथमं समुपस्थापितः ।

अथवा

(*Or*)

अन्धतमसे नवे आहिण्डमानयोः कृष्णसुदाम्नोः क्षुत्पीडितयोः भोजनवेलोपस्थिता । इन्धनं संगृह्य शीघ्रमेवागत्य अपराह्णभोजनं करिष्यामीति विचार्य कृष्णः स्वभोजनं बलरामस्य समीपे निहितवानासीत् । सुदाम्नः भोजनं तत्रासीत् । किन्तु सुदामा स्वभोजनात् स्वल्पमपि भागं कृष्णाय न दत्तवानिति आश्चर्यकरमप्यवितथं वृत्तम् । तत्कथम् ?

भगवते कृष्णाय यः कश्चित् किञ्चिदपि ददाति, तस्य दारिद्र्यं तेन भगवता झटिति दूरीक्रियते' इति कृष्णमधिकृत्य एका प्रसिद्धा अनुश्रुतिः आसीत् ।

7. निम्नलिखित की सप्रसंग व्याख्या कीजिए : 6

Explain the following with reference to the context :

ब्राह्ममुहूर्ते उत्थाय इमे विद्यार्थिनो गुरोः सविधे सन्ध्याविधिं सम्पादिवन्तः । तथा हि-ओउम् भूः, भुवः, स्वः । 'तत् सवितुःवरेण्यं

भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥' यथाकालं महर्षिणास्य मन्त्रस्य व्याख्या कृता—विद्यार्थिनः ! न केवलं स्वग्रामः, जनपदः, देशो वा स्वकीय इति मन्तव्यम्, अपि तु सर्वोऽयं भूलोको युष्माकं भोगाय, ज्ञानाय, रक्षणाय च वर्तते, युष्मत् संरक्षणम्, संवर्धनं चार्हति । तद्यथा पूर्वैः अनूचानैः समर्थितम्—वसुधैव कुटुम्बकमिति ।

**अथवा**

(*Or*).

नवदम्पती यमुनादेव्या मनोऽनुकूलाशंसनेन शुभलक्षणप्रदर्शनेन च प्रसन्नमानसौ बभूवतुः । अनन्तरं सर्वासां नगरदेवतानामर्चनां कृत्वा सुदामा कौमुद्या सह श्वशुरगृहं प्रतिनिवृत्तः । गुरुजनैरनुमतौ नागरिकाणामाशीर्वचनं शृण्वन्तौ, प्रणामाञ्जलिना सर्वेषां कृते समादरं प्रकाशयन्तौ च नवदम्पती राजरथारूढौ मथुरातः निर्जग्मतुः ।

8. प्रो. रामजी उपाध्याय द्वारा रचित 'द्वा सुपर्णा' उपन्यास में चित्रित सुदामा का चरित्र प्रस्तुत कीजिए । 6

Portray the character of Sudama as depicted in Prof. Ramji Upadhyaya's novel 'द्वा सुपर्णा'.

9. निम्नलिखित का अनुवाद कीजिए : 5

Translate the following :

शान्तिलाल: — एवं भवतु यथा भवत्यै रोचते । परंतु अहं शिवालयं अवश्यं गच्छामि याचनाय । आजीवनं अयाचकव्रतधारी अहम् । अवश्यं नीलकंठः शीघ्रवरदाता तस्य भक्तस्य दासस्य याचनां, पुत्रेच्छां पूरयिष्यति एव । ओउम् नमः शिवाय। भगवान् महादेवः आवयोः मनः कामनां पूरयिष्यति । अतः मा रोदीः ।

शान्तिः — नाथ यदि न रोदिमि तर्हि किं करोमि ? नारीजन्म प्राप्य नारी यदि पत्युः प्रणयपरिपाकसेतुरूपं पुत्ररत्नं न अधिगच्छति तर्हि वृथा तस्याः जन्म । प्रभो, पुत्रस्य अभावे आवयोः पिंडदानं कः करिष्यति ? श्राद्धतर्पणादि विना आवयोः मुक्तिः कथं कथं भविष्यति ? देहि देहि मे तनयम् ।

अथवा

(*Or*)

(षण्मासानन्तरं, स एव हिमालयस्य विविक्त-प्रदेशः शिबिर-रहितो समुदासीनः प्रतीयते । देवता-प्रतिमा-पूजा-सामग्र्यादिरहितं

दुर्गा-मंदिरं शून्यं तिष्ठति । पटावतरणे 'छानी बिलौरी' नाम कुमाउनीयं गीतं वादित्रेण गीयते । एकैकशः कानिचित् पात्राणि प्रविशन्ति) ।

प्रथमः सैनिकः – (इतस्ततो विलोकयन्) कियद् आह्लादको वसन्त-कालोऽयम्; नीलंगला-कूटे शोभते च राष्ट्रिय-ध्वजः ।

गोविन्दसिंहः – (प्रविश्य) एवम् एव, परं डिम्भं त्यक्त्वा दुर्मनायते मच्चेतः । (विरम्य पृष्ठतोऽवलोकयन्) अये, कलावतीत एवाऽभिवर्त्तते । वस्तुतः 'पति-हीना तु या नारी न सा शक्ष्यति जीवितुम् ।

10. 'अर्थो हि पुत्रः परकीय एव' एकांकी द्वारा सम्प्रेषित सामाजिक सन्देश की विवेचना कीजिए । 7

Analyse the social message conveyed through the one-act-play entitled 'अर्थो हि पुत्रः परकीय एव'.

अथवा

(*Or*)

भारत की तत्कालीन विदेश नीति के सन्दर्भ में 'जयन्तु कुमाउनीयाः' नाटक का मूल्यांकन कीजिए ।

Evaluate the play 'जयन्तु कुमाउनीयाः' in the context of the then foreign policy of India.

11. (*i*) किन्हीं **दो** पर संक्षिप्त टिप्पणी लिखिए : 6

Write short notes on any *two* of the following :

पण्डिताक्षमाराव, मथुरा प्रसाद दीक्षित, प्रो. आर. श्री हरि, रामजी उपाध्याय ।

(*ii*) संस्कृत में प्रकाशित किन्हीं **चार** पत्रिकाओं का परिचय दीजिए । 4

Write an introductory note on any *four* magazines published in Sanskrit.

(*iii*) आधुनिक संस्कृत साहित्य को किन्हीं तीन गद्य-रचनाओं अथवा तीन महाकाव्यों का उल्लेख कीजिए । 6

Describe any *three* prose works or *three* Mahakavyas of Modern Sanskrit Literature.

अथवा

(*Or*)

आधुनिक संस्कृत साहित्य की प्रवृत्तियों का समसामयिक मूल्यों के सन्दर्भ में मूल्यांकन कीजिए ।

Evaluate the trends of Modern Sanskrit Literature in the context of contemporary values.